# shrIshivakAmasundarIsahasranamastotram

# श्रीशिवकामसुन्दरीसहस्रनामस्तोत्रम्

## Document Information

Text title : shrI shivakAmasundarI sahasranAmAvalI 1 1000 names

File name : shivakAmasundarIsahasranAmAvalI.itx

Category : sahasranAmAvalI, devii, nAmAvalI, devI, pArvatI

Location : doc_devii

Proofread by : DPD, Sneha Sudha snehasudha13 at gmail.com

Description-comments : From Bhringiriti Samhita

Latest update : May 1, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# श्रीशिवकामसुन्दरीसहस्रनामस्तोत्रम्

ॐ अस्य श्री शिवकामसुन्दरीसहस्रनामस्तोत्रमहा
मन्त्रस्य । आनन्दभैरवदक्षिणामूर्तिः ऋषिः । देवी गायत्री
छन्दः । श्रीशिवकामसुन्दरी देवता । बीजं शक्तिः कीलकं
कराङ्गन्यासौ च श्रीमहात्रिपुरसुन्दरीमहामन्त्रवत् ।

॥ ध्यानम् ॥

पद्मस्थां कनकप्रभां परिलसत्पद्माक्षियुग्मोत्पलाम्
अक्षस्रक्षुकशारिकाकटिलसत् कल्हार हस्ताब्जिनीम् ।
रक्तस्रक्सुविलेपनाम्बरधरां राजीवनेत्रार्चितां
ध्यायेत् श्रीशिवकामकोष्ठनिलयां नृत्तेश्वरस्य प्रियाम् ॥

मुक्ताकुन्देन्दुगौरां मणिमयमकुटां रत्नताण्टङ्कयुक्तां
अक्षस्रक्पुष्पहस्ता सशुककटिकरां चन्द्रचूडां त्रिनेत्रीम् ।
नानालङ्कारयुक्तां सुरमकुटमणिद्योतित स्वर्णपीठां
यासापद्मासनस्थां शिवपदसहितां सुन्दरीं चिन्तयामि ॥

रत्नताटङ्कसंयुक्तां सुवर्णकवचान्विताम् ।
दक्षिणोर्ध्वकराग्रेण स्वर्णमालाधरां शुभाम् ॥

दक्षाधः करपद्मेन पुल्लकल्हार धारिणीम् ।
वामेनोएध्वकराब्जेन शुकार्भकधरां वराम् ।
कटिदेशे वामहस्तं न्यस्यन्तीं च सुदर्शनाम् ॥

शिवकामसुन्दरीं नौमि प्रसन्नवदनां शिवाम् ।
लमित्यादिपञ्चपूजा ॥

॥ अथ श्रीशिवकामसुन्दरीसहस्रनामावलिः ॥

ॐ ऐं ह्रीं श्रीं अम् ॥

ॐ अगण्यायै नमः ।
ॐ अगण्यमहिमायै नमः ।
ॐ असुरप्रेतासनस्थितायै नमः ।
ॐ अजरायै नमः ।
ॐ अमृत्युजननायै नमः ।
ॐ अकालान्तकभीकरायै नमः ।
ॐ अजायै नमः ।
ॐ अजांशसमुद्भूतायै नमः ।
ॐ अमरालीवृतगोपुरायै नमः ।
ॐ अत्युग्राजिनटच्छत्रुकबन्धानेककोटिकायै नमः । १०
ॐ अद्रिदुर्गायै नमः ।
ॐ अणिमासिद्धिदापितेष्टामरावल्यै नमः ।
ॐ अनन्तायै नमः ।
ॐ अनन्यसुलभप्रियायै नमः ।
ॐ अद्भुतविभूषणायै नमः ।
ॐ अनूरुकरसङ्काशायै नमः ।
ॐ अखण्डानन्दस्वरूपिण्यै नमः ।
ॐ अन्धीकृतद्विजारातिनेत्रायै नमः ।
ॐ अत्युग्राट्टहासिन्यै नमः ।
ॐ अन्नपूर्णायै नमः । २०
ॐ अपरायै नमः ।
ॐ अलक्ष्यायै नमः ।
ॐ अम्बिकायै नमः ।
ॐ अघविनाशिन्यै नमः ।
ॐ अपारकरुणापूरनिभरेखां जनाक्षिण्यै नमः ।
ॐ अमृताम्भोधिमध्यस्थायै नमः ।
ॐ अणिमासिद्धिमुखाश्रितायै नमः ।
ॐ अरविन्दाक्षमालालिपात्रशूलधरायै नमः ।
ॐ अनघायै नमः ।
ॐ अश्वमेधमखावाप्तहविःपुजकृतादरायै नमः । ३०
ॐ अश्वसेनावृतायै नमः ।
ॐ अनेकपारूढायै नमः ।

ॐ अगजन्मभूः   ॐ ऐं ह्रीं श्रीं आं - नमः ।
ॐ आकाशविग्रहायै नमः ।
ॐ आनन्ददात्र्यै नमः ।
ॐ आज्ञाब्जभासुरायै नमः ।
ॐ आचारतत्परस्वान्तपद्मसंस्थायै नमः ।
ॐ आढ्यपूजितायै नमः ।
ॐ आत्मायत्तजगच्चक्रायै नमः ।
ॐ आत्मारामपरायणायै नमः । ४०
ॐ आदित्यमण्डलान्तस्थायै नमः ।
ॐ आदिमध्यान्तवर्जितायै नमः ।
ॐ आद्यन्तरहितायै नमः ।
ॐ अचार्यायै नमः ।
ॐ आदिक्षान्तार्णरूपिण्यै नमः ।
ॐ आद्यायै नमः ।
ॐ अमात्युनुतायै नमः ।
ॐ आज्यहोमप्रीतायै नमः ।
ॐ आवृताङ्गनायै नमः ।
ॐ आधारकमलारूढायै नमः । ५०
ॐ आधाराधेयविवर्जितायै नमः ।
ॐ आधिहीनायै नमः ।
ॐ आसुरीदुर्गायै नमः ।
ॐ आजिसङ्क्षोभितासुरायै नमः ।
ॐ आधोरणाज्ञाशुण्डाग्राकृष्टासुरगजावृतायै नमः ।
ॐ आश्चर्यवियहायै नमः ।
ॐ आचार्यसेवितायै नमः ।
ॐ आगमसंस्तुतायै नमः ।
ॐ आश्रिताखिलदेवादिवृन्दरक्षणतत्परायै ॐ ऐं ह्रीं श्रीं इं - नमः ।
ॐ इच्छाज्ञानक्रियाशक्तिरूपायै नमः । ६०
ॐ इरावतिसंस्तुतायै नमः ।
ॐ इन्द्राणीरचितश्वेतच्छत्रायै नमः ।
ॐ इडाभक्षणप्रियायै नमः ।
ॐ इन्द्रा नमः ।

ॐ इन्द्रार्चितायै नमः ।
ॐ इन्द्राण्यै नमः ।
ॐ इन्दिरापतिसोदर्यै नमः ।
ॐ इन्दिरायै नमः ।
ॐ इन्दीवरश्यामायै नमः ।
ॐ इरम्मदसमप्रभायै नमः । ७०
ॐ इभकुम्भाभवक्षोजद्वयायै नमः ।
ॐ इक्षुधनुर्धरायै नमः ।
ॐ इभदन्तोरुनयनायै नमः ।
ॐ एन्द्रगोपसमाकृत्यै नमः ।
ॐ इभशुण्डोरुयुगलायै नमः ।
ॐ इन्दुमण्डलमध्यगायै नमः ।
ॐ इष्टार्तिघ्नीयै नमः ।
ॐ इष्टवरदायै नमः ।
ॐ एभवक्त्रप्रियङ्कर्यै ॐ ऐं ह्रीं श्रीं ई - नमः ।
ॐ ईशित्वसिद्धिसंप्रार्थितापसायै नमः । ८०
ॐ इषत्स्मिताननायै नमः ।
ॐ ईश्वर्यै नमः ।
ॐ इशप्रियायै नमः ।
ॐ इशताण्डवालोकनोत्सुकायै नमः ।
ॐ ईक्षणोत्पन्नभुवनकदम्बायै नमः ।
ॐ इड्यवैभवायै   ॐ ऐं ह्रीं श्रीं उं - नमः ।
ॐ उच्चनीचादिरहितायै नमः ।
ॐ उरुकान्तारवासिन्यै नमः ।
ॐ उत्साहरहितेन्द्रारये नमः ।
ॐ उरुसन्तोषितामरायै नमः । ९०
ॐ उदासीनायै नमः ।
ॐ उडुराड्वक्त्रायै नमः ।
ॐ उग्रकृत्यविदुषिण्यै नमः ।
ॐ उपाधिरहितायै नमः ।
ॐ उपादानकारणायै नमः ।
ॐ उन्मत्तनृर्तक्यै नमः ।

ॐ उरुस्यन्दनसम्बद्धकोट्यश्वायै नमः ।
ॐ उरुपराक्रमायै नमः ।
ॐ उल्कामुख्यै नमः ।
ॐ उमादेव्यै नमः । १००
ॐ उन्मत्तक्रोधभैरव्यै   ॐ ऐं ह्रीं श्रीं ऊं - नमः ।
ॐ ऊर्जिताज्ञायै नमः ।
ॐ ऊढभुवनकदम्बायै नमः ।
ॐ ऊर्ध्वमुखावल्यै नमः ।
ॐ ऊर्ध्वप्रसारिताङ्घ्रीशदर्शनोद्विग्नमानसायै नमः ।
ॐ ऊहापोहविहीनायै नमः ।
ॐ ऊरुजितरम्भामनोहरायै ॐ ऐं ह्रीं श्रीं ऋं - नमः ।
ॐ ऋग्वेदसंस्तुतायै नमः ।
ॐ ऋद्धिदायिन्यै नमः ।
ॐ ऋणमोचिन्यै नमः । ११०
ॐ ऋजुमार्गपरप्रीतायै नमः ।
ॐ ऋषभध्वजभासुरायै नमः ।
ॐ ऋद्धिकाममुनिव्रातसत्रयागसमर्चितायै   ॐ ऐं ह्रीं श्रीं ॠं - नमः ।
ॐ ॠकारवाच्यायै नमः ।
ॐ ॠक्षादिवृतायै नमः ।
ॐ ॠकारनासिकायै ॐ ऐं ह्रीं श्रीं ऌं - नमः ।
ॐ ऌकरिण्यै नमः ।
ॐ ऌकारोष्ठायै ॐ ऐं ह्रीं श्रीं ॡं - नमः ।
ॐ ॡवर्णाधरपल्लवायै   ॐ ऐं ह्रीं श्रीं एं - नमः ।
ॐ एकाकिन्यै नमः । १२०
ॐ ऐकमन्त्राक्षरायै नमः ।
ॐ ऐधितोत्साहवल्लभायै ॐ ऐं ह्रीं श्रीं ऐं - नमः ।
ॐ ऐश्वर्यदात्र्यै ॐ ऐं ह्रीं श्रीं ॐ - नमः ।
ॐ ओङ्कारवादिवागीशसिद्धिदायै नमः ।
ॐ ओजःपुञ्जघनीसान्द्ररूपिण्यो नमः ।
ॐ ओङ्कारमध्यगायै नमः ।
ॐ ओषधीशमनुप्रीतायै ॐ ऐं ह्रीं श्रीं औं - नमः ।
ॐ औदार्यगुपावारिध्यै नमः ।

ॐ औपम्यरहिताचैव ॐ ऐं ह्रीं श्रीं अं - नमः ।
ॐ अम्बुजासनसुन्दर्यै नमः । १३०
ॐ अम्बराधीशनटनसाक्षिण्यै ॐ ऐं ह्रीं श्रीं अः - नमः ।
ॐ अः पददायिन्यै ॐ ऐं ह्रीं श्रीं कं - नमः ।
ॐ कबरीबन्धमुखरीभमरभ्रमरालकायै नमः ।
ॐ करवाललताधाराभीषणायै नमः ।
ॐ कौमुदीनिभायै नमः ।
ॐ कर्पूराम्बायै नमः ।
ॐ कालरात्र्यै नमः ।
ॐ काल्यै नमः ।
ॐ कलिविनाशिन्यै नमः ।
ॐ कादिविद्यामय्यै नमः । १४०
ॐ काम्यायै नमः ।
ॐ काञ्चनाभायै नमः ।
ॐ कलावत्यै नमः ।
ॐ कामेश्वर्यै नमः ।
ॐ कामराजमनुप्रीतायै नमः ।
ॐ कृपावत्यै नमः ।
ॐ कार्तवीर्यद्विसाहस्रदोर्दण्डपटहध्वन्यै नमः ।
ॐ किटिवक्त्राधिकारोद्यद्गणप्रोत्साहिताङ्गनायै नमः ।
ॐ कीर्तिप्रदायै नमः ।
ॐ कीर्तिमत्यै नमः । १५०
ॐ कुमार्यै नमः ।
ॐ कुलसुन्दर्यै नमः ।
ॐ कुन्तायुधधरायै नमः ।
ॐ कुब्जिकाम्बायै नमः ।
ॐ कुध्रविहारिण्यै नमः ।
ॐ कुलागमरहस्यज्ञवाञ्छादानपरायणायै नमः ।
ॐ कूटस्थितिजुष्यै नमः ।
ॐ कूर्मपृष्ठजित्प्रपदान्वितायै नमः ।
ॐ केकाशब्दतिरस्कारिबाणासनमणीरवायै नमः ।
ॐ केशाकेशिचणायै नमः । १६०

ॐ केशिराक्षसाधिपमर्दिन्यै नमः ।
ॐ कैतकच्छदसन्ध्याभपिशङ्गितकचाम्बुदायै नमः ।
ॐ कैलासोत्तुङ्गशृङ्गाद्रविलासेशपराजितायै नमः ।
ॐ कैशिक्यारभटीरीतिस्तुतरक्तेश्वरीप्रियायै नमः ।
ॐ कोकाहितकरस्पर्धिनखायै नमः ।
ॐ कोकिलवादिन्यै नमः ।
ॐ कोपहुङ्कारसन्त्रस्तससेनासुरनायकायै नमः ।
ॐ कोलाहलरवोद्रेकरिङ्खज्जम्बुकमण्डलायै नमः ।
ॐ कौण्डिन्यान्वयसम्भूतायै नमः ।
ॐ करिचर्माम्बरप्रियायै नमः । १७०
ॐ कौपीनशिष्टविप्रर्षिस्तुतायै नमः ।
ॐ कौलिकदेशिकायै नमः ।
ॐ कौसुम्भास्तरणायै नमः ।
ॐ कौलमार्गनिष्ठान्तरास्थितायै नमः ।
ॐ कङ्कणाहिगणक्षेमवचनोद्विग्नताक्ष्येकायै नमः ।
ॐ कञ्जाक्ष्यै नमः ।
ॐ कञ्जविनुतायै नमः ।
ॐ कञ्जजातिप्रियङ्कर्यै   ॐ ऐं ह्रीं श्रीं खं - नमः ।
ॐ खड्गखेटकदोर्दण्डायै नमः ।
ॐ खट्वाङ्ग्यै नमः । १८०
ॐ खड्गसिद्धिदायै नमः ।
ॐ खण्डितासुरगर्वाद्र्यै नमः ।
ॐ खलादृष्टस्वरूपिण्यै नमः ।
ॐ खण्डेन्दुमौलिहृदयायै नमः ।
ॐ खण्डितार्केन्दुमण्डलायै नमः ।
ॐ खरांशुतापशमन्यै नमः ।
ॐ खस्थायै नमः ।
ॐ खेचरसंस्तुतायै नमः ।
ॐ खेचर्यै नमः ।
ॐ खेचरीमुद्रायै नमः । १९०
ॐ खेचराधीशवाहनायै नमः ।
ॐ खेलापारावतरतिप्रीतायै नमः ।

ॐ खाद्यायितान्तकायै   ॐ ऐं ह्रीं श्रीं गं - नमः ।
ॐ गगनायै नमः ।
ॐ गगनान्तस्थायै नमः ।
ॐ गगनाकारमध्यमायै नमः ।
ॐ गजारूढायै नमः ।
ॐ गजमुख्यै नमः ।
ॐ गाथागीतामराङ्गनायै नमः ।
ॐ गदाधर्यै नमः । २००
ॐ गदाधातमूर्छितानेकपासुरायै नमः ।
ॐ गरिमालघिमासिद्धिवृतायै नमः ।
ॐ ग्रामादिपालिन्यै नमः ।
ॐ गर्वितायै नमः ।
ॐ गन्धवसनायै नमः ।
ॐ गन्धवाहसमर्चितायै नमः ।
ॐ गर्वितासुरदाराश्रुपङ्क्तिताजिवसुन्धरायै नमः ।
ॐ गायत्र्यै नमः ।
ॐ गानसन्तुष्टायै नमः ।
ॐ गन्धर्वाधिपतीडितायै नमः । २१०
ॐ गिरिदुर्गायै नमः ।
ॐ गिरीशानसुतायै नमः ।
ॐ गिरिवराश्रयायै नमः ।
ॐ गिरीन्द्रक्रूरकठिनकर्षद्धलवरायुधायै नमः ।
ॐ गीतचारित्रहरितशुकैकगतमानसायै नमः ।
ॐ गीतिशास्त्रगुरवे नमः ।
ॐ गीतिहृदयायै नमः ।
ॐ गीरे नमः ।
ॐ गिरीश्वर्यै नमः ।
ॐ गीर्वाणदनुजाचार्यपूजितायै नमः । २२०
ॐ गृध्रवाहनायै नमः ।
ॐ गुडपायससन्तुष्टहृद्ये नमः ।
ॐ गुप्ततरयोगिन्यै नमः ।
ॐ गुणातीतायै नमः ।

ॐ गुरुवे नमः ।
ॐ गौर्यै नमः ।
ॐ गोश्र्यै नमः ।
ॐ गोविन्दसोदर्यै नमः ।
ॐ गुरुमूर्तये नमः ।
ॐ गुणाम्भोधये नमः । २३०
ॐ गुणागुणविवर्जितायै नमः ।
ॐ गुहेष्टदायै नमः ।
ॐ गुहावासियोगिचिन्तितरूपिण्यै नमः ।
ॐ गुह्यागमरहस्यज्ञायै नमः ।
ॐ गुह्यकानन्ददायिन्यै नमः ।
ॐ गुह्यायै नमः ।
ॐ गुह्यार्चितायै नमः ।
ॐ गुह्यस्थानबिन्दुस्वरूपिण्यै नमः ।
ॐ गोदावरीनदीतीरवासिन्यै नमः ।
ॐ गुणवर्जितायै नमः । २४०
ॐ गोमेदकमणीकर्णकुण्डलायै नमः ।
ॐ गोपपालिन्यै नमः ।
ॐ गोसवासक्तहृदयायै नमः ।
ॐ गोशृङ्गध्यानमोदिन्यै नमः ।
ॐ गङ्गागर्वङ्कषोद्युक्तरुद्रप्रोत्साहवादिन्यै नमः ।
ॐ गन्धर्ववनितामालामोदिन्यै नमः ।
ॐ गर्वनाशिन्यै नमः ।
ॐ गुञ्जामणिगणप्रोतमालाभासुरकन्धरायै ॐ ऐं ह्रीं श्रीं घं - नमः ।
ॐ घटवाद्यप्रियायै नमः ।
ॐ घोरकोणपघ्न्यै नमः । २५०
ॐ घटार्गलायै नमः ।
ॐ घटिकायै नमः ।
ॐ घटिकामुख्यषड्वारायणमोदिन्यै नमः ।
ॐ घण्टाकर्णादिविनुतायै नमः ।
ॐ घनज्योतिर्लतानिभायै नमः ।
ॐ घनश्यामायै नमः ।

ॐ घटोत्भूततापसात्मार्थदेवतायै नमः ।
ॐ घनसारानुलिप्ताङ्ग्यै नमः ।
ॐ घोणोद्धूतवसुन्धरायै नमः ।
ॐ घनस्फटिकसङ्क्लृप्तसालान्तरकदम्बकायै नमः । २६०
ॐ घनाल्युद्भेदशिखरगोपुरानेकमन्दिरायै नमः ।
ॐ घूर्णीताक्ष्यै नमः ।
ॐ घृणासिन्धवे नमः ।
ॐ घृणिविद्यायै नमः ।
ॐ घटेश्वर्यै नमः ।
ॐ घृतकाठिन्यहृदे नमः ।
ॐ घण्टामणिमालाप्रसाधनायै नमः ।
ॐ घोरकृत्यायै नमः ।
ॐ घोरवाद्यायै नमः ।
ॐ घोराघौघविनाशिन्यै नमः । २७०
ॐ घोराय नमः ।
ॐ घनकृपायुक्तायै नमः ।
ॐ घननीलाम्बरान्वितायै नमः ।
ॐ घोरास्यायै नमः ।
ॐ घोरशूलाग्रप्रोतासुरकलेवरायै नमः ।
ॐ घोषत्रस्तान्तकभटायै नमः ।
ॐ घोरसङ्घोषकृद्धलायै ॐ ऐं ह्रीं श्रीं ङं - नमः ।
ॐ ङान्तार्णाद्यमनुप्रीतायै नमः ।
ॐ ङाकारायै नमः ।
ॐ ङीम्परायणायै नमः । २८०
ॐ ङीकारिममञ्जुमञ्जीरचरणायै नमः ।
ॐ ङाङ्कित्ताङ्गुल्यै ॐ ऐं ह्रीं श्रीं चं - नमः ।
ॐ चक्रवर्तिसमाराध्यायै नमः ।
ॐ चक्रनेमिरवोन्तुकायै नमः ।
ॐ चण्डमार्ण्डधिक्कारिप्रभायै नमः ।
ॐ चक्राधिनायिकायै नमः ।
ॐ चण्डालास्यपरामोदायै नमः ।
ॐ चण्डवादपटीयस्यै नमः ।

ॐ चण्डिकायै नमः ।
ॐ चण्डकोदण्डायै नमः । २९०
ॐ चण्डघ्न्यै नमः ।
ॐ चण्डभैरव्यै नमः ।
ॐ चतुरायै नमः ।
ॐ चतुराम्नायशिरोलक्षितरूपिण्यै नमः ।
ॐ चतुरङ्गबलोपेतायै नमः ।
ॐ चराचरविनोदिन्यै नमः ।
ॐ चतुर्वक्त्रायै नमः ।
ॐ चक्रहस्तायै नमः ।
ॐ चक्रपाणिसमर्चितायै नमः ।
ॐ चतुष्षष्टिकलारूपायै नमः । ३००
ॐ चतुष्षष्ट्यचर्चनोत्सुकायै नमः ।
ॐ चन्द्रमण्डलमध्यस्थायै नमः ।
ॐ चतुर्वर्गफलप्रदायै नमः ।
ॐ चमरीमृगयोद्युक्तायै नमः ।
ॐ चिरञ्जीवित्वदायिन्यै नमः ।
ॐ चम्पकाशोकस्रद्बद्धचिकुरायै नमः ।
ॐ चरुभक्षिण्यै नमः ।
ॐ चराचरजगद्धात्र्यै नमः ।
ॐ चन्द्रिकाधवलस्मितायै नमः ।
ॐ चर्माम्बरधरायै नमः । ३१०
ॐ चण्डक्रोधहुङ्कारभीकरायै नमः ।
ॐ चाटुवादप्रियायै नमः ।
ॐ चामीकरपर्वतवासिन्यै नमः ।
ॐ चापिन्यै नमः ।
ॐ चापमुक्तेषुच्छन्नदिग्भ्रान्तपन्नगायै नमः ।
ॐ चित्रभानुमुख्यै नमः ।
ॐ चित्रसेनायै नमः ।
ॐ चित्राङ्गदेष्टदायै नमः ।
ॐ चित्रलेखायै नमः ।
ॐ चिदाकाशमध्यगायै नमः । ३२०

ॐ चिन्तितार्थदायै नमः ।
ॐ चिन्त्यायै नमः ।
ॐ चिरन्तन्यै नमः ।
ॐ चित्रायै नमः ।
ॐ चित्राम्बायै नमः ।
ॐ चित्तवासिन्यै नमः ।
ॐ चैतन्यरूपायै नमः ।
ॐ चिच्छक्त्यै नमः ।
ॐ चिदम्बरविहारिण्यै नमः ।
ॐ चोरघ्न्यै नमः । ३३०
ॐ चौर्यविमुखायै नमः ।
ॐ चतुर्दशमनुप्रियायै ॐ ऐं ह्रीं श्रीं छं - नमः ।
ॐ छत्रचामरभृल्लक्ष्मीवागिन्द्राणीरतीवृतायै नमः ।
ॐ छन्दश्शास्त्रमय्यै नमः ।
ॐ छन्दोलक्ष्यायै नमः ।
ॐ छेदविवर्जितायै नमः ।
ॐ छन्दोरूपायै नमः ।
ॐ छन्दगत्यै नमः ।
ॐ छन्दश्शिरविहारिण्यै नमः ।
ॐ छद्मह्रते नमः । ३४०
ॐ छविसन्दीप्तसूर्यचन्द्राग्नितारकायै नमः ।
ॐ छर्दिताण्डावल्यै नमः ।
ॐ छादिताकारायै नमः ।
ॐ छिन्नसंशयायै नमः ।
ॐ छायापतिसमाराध्यायै नमः ।
ॐ छायाम्बायै नमः ।
ॐ छत्रसेवितायै नमः ।
ॐ छिन्नमस्ताबिकायै नमः ।
ॐ छिन्नशीर्षशत्रवे नमः ।
ॐ छलान्तक्यै नमः । ३५०
ॐ छेदितासुरजिह्वाग्रायै नमः ।
ॐ छत्रीकृतयशस्विन्यै ॐ ऐं ह्रीं श्रीं जं - नमः ।

ॐ जगन्मातात्रै नमः ।
ॐ जगत्साक्षिण्यै नमः ।
ॐ जगद्योने नमः ।
ॐ जगद्गुरवे नमः ।
ॐ जगन्मायायै नमः ।
ॐ जगन्त्वृन्दवन्दितायै नमः ।
ॐ जयिन्यै नमः ।
ॐ जयायै नमः । ३६०
ॐ जनजाड्यप्रतापघ्यै नमः ।
ॐ जितासुरमहाव्रजायै नमः ।
ॐ जनन्यै नमः ।
ॐ जगदानन्ददात्र्यै नमः ।
ॐ जह्नुसमर्चितायै नमः ।
ॐ जपमालावराभीतिमुद्रापुस्तकधारिण्यै नमः ।
ॐ जपयज्ञपराधीनहृदयायै नमः ।
ॐ जगदीश्वर्यै नमः ।
ॐ जपाकुसुमसङ्काशायै नमः ।
ॐ जन्मादिध्वंसकारणायै नमः । ३७०
ॐ जालध्रपूर्णकामोड्याणचतुष्पीठरूपिण्यै नमः ।
ॐ जीवनार्थिद्विजव्रातत्राणनाबद्धकङ्कणायै नमः ।
ॐ जीवब्रह्मैकताकाङ्क्षिजनताकीर्णपार्वभूः नमः ।
ॐ जम्भिन्यै नमः ।
ॐ जम्भभित्पूल्यायै नमः ।
ॐ जाग्रदादित्रयातिगायै नमः ।
ॐ जलदग्निधरायै नमः ।
ॐ ज्वालाप्रोच्चकेश्यै नमः ।
ॐ ज्वरार्तिहृते नमः ।
ॐ ज्वालामालिनिकायै नमः । ३८०
ॐ ज्वालामुख्यै नमः ।
ॐ जैमिनिसंस्तुतायै   ॐ ऐं ह्रीं श्रीं झं - नमः ।
ॐ झलञ्झलकृतस्वर्णमञ्जीरायै नमः ।
ॐ झषलोचनायै नमः ।

ॐ झषकुण्डलिन्यै नमः ।
ॐ झल्लरीवाद्यमुदिताननायै नमः ।
ॐ झषकेतुसमाराध्यायै नमः ।
ॐ झषमांसान्नभक्षिण्यै नमः ।
ॐ झषोपद्रवकृद्धन्त्र्यै नमः ।
ॐ झम्रूम्मन्त्राधिदेवतायै नमः । ३९०
ॐ झञ्झानिलातिगमनायै नमः ।
ॐ झषराण्णीतसागरायै ॐ ऐं ह्रीं श्रीं झं - नमः ।
ॐ ज्ञानमुद्राधरायै नमः ।
ॐ ज्ञानिहृत्पद्मकुहरास्थितायै नमः ।
ॐ ज्ञानमूर्तये नमः ।
ॐ ज्ञानगम्यायै नमः ।
ॐ ज्ञानदायै नमः ।
ॐ ज्ञातिवर्जितायै नमः ।
ॐ ज्ञेयायै नमः ।
ॐ ज्ञेयादिरहितायै नमः । ४००
ॐ ज्ञात्र्यै नमः ।
ॐ ज्ञानस्वरूपिण्यै   ॐ ऐं ह्रीं श्रीं टं - नमः ।
ॐ टङ्कपुष्पालिस्रञ्मञ्जुकन्धरायै नमः ।
ॐ टङ्किताचलायै नमः ।
ॐ टङ्कवेत्रादिकानेकशस्त्रभृद्दोर्लतावल्यै नमः ।
ॐ ठकारनिभवक्षोजद्वयाधोवृत्तभासुरायै नमः ।
ॐ ठकाराङ्कितजान्वग्रजितकोरकिताम्बुजायै   ॐ ऐं ह्रीं श्रीं ठं - नमः ।
ॐ डाकिन्यै नमः ।
ॐ डामरीतन्त्ररूपायै नमः ।
ॐ डाडिमपाटलायै नमः । ४१०
ॐ डम्बघ्न्यै नमः ।
ॐ डम्बराडम्बरोन्मुख्यै नमः ।
ॐ डमरुप्रियायै नमः ।
ॐ डिम्बदानचणायै नमः ।
ॐ डोलामुदितायै नमः ।
ॐ डुण्ठिपूजितायै ॐ ऐं ह्रीं श्रीं ढं - नमः ।

ॐ ढकानिनदसन्तुष्टशिखिनृत्तसमुत्सुकायै   ॐ ऐं ह्रीं श्रीं णं - नमः ।
ॐ णकारपञ्जरशुक्यै नमः ।
ॐ णकारोद्यानकोकिलायै ॐ ऐं ह्रीं श्रीं तं - नमः ।
ॐ तत्त्वातीतायै नमः । ४२०
ॐ तपोलक्ष्यायै नमः ।
ॐ तप्तकाञ्चनसन्निभायै नमः ।
ॐ तन्व्यै नमः ।
ॐ तत्त्वमसीवाक्यविषयायै नमः ।
ॐ तरुणीवृतायै नमः ।
ॐ तर्जन्यङ्गुष्ठसंयोगज्ञानब्रह्ममुनीश्वरायै नमः ।
ॐ तर्जितानेकदनुजायै नमः ।
ॐ तक्षक्यै नमः ।
ॐ तडितालिभायै नमः ।
ॐ ताम्रचूडध्वजोत्सङ्गायै नमः । ४३०
ॐ तापत्रयविनाशिन्यै नमः ।
ॐ ताराम्बायै नमः ।
ॐ तारक्यै नमः ।
ॐ तारापूज्यायै नमः ।
ॐ ताण्डवलोलुपायै नमः ।
ॐ तिलोत्तमादिदेवस्त्रीशारीरोन्सुकमानसायै नमः ।
ॐ तिल्वद्रुसङ्कुलाभोगकान्तारान्तरवासिन्यै नमः ।
ॐ त्रयीद्विड्रसनारक्तपानलोलासिधारिण्यै नमः ।
ॐ त्रयीमय्यै नमः ।
ॐ त्रयीवेद्यायै नमः । ४४०
ॐ त्र्यय्यन्तोद्गीतवैभवायै नमः ।
ॐ त्रिकोणस्थायै नमः ।
ॐ त्रिकालज्ञायै नमः ।
ॐ त्रिकूटायै नमः ।
ॐ त्रिपुरेश्वर्यै नमः ।
ॐ त्रिचत्वारिंशदश्राङ्कचक्रान्तर्बिन्दुसंस्थितायै नमः ।
ॐ त्रितारायै नमः ।
ॐ तुम्बुरूद्गीतायै नमः ।

ॐ तार्क्ष्याकारायै नमः ।
ॐ त्रिकाग्निजायै नमः । ४५०
ॐ त्रिपुरायै नमः ।
ॐ त्रिपुरध्वंसिप्रियायै नमः ।
ॐ त्रिपुरसुन्दर्यै नमः ।
ॐ त्रिस्थायै नमः ।
ॐ त्रिमूर्तिसहजशक्त्यै नमः ।
ॐ त्रिपुरभैरव्यै ॐ ऐं ह्रीं श्रीं थं - नमः ।
ॐ थां थीकरमृदगादिभृद्विष्णुमुखसेवितायै नमः ।
ॐ थां थीं तक्तक थिं तोकृत्तालध्वनिसभाङ्गणायै ॐ ऐं ह्रीं श्रीं दं - नमः ।
ॐ दक्षायै नमः ।
ॐ दाक्षायण्यै नमः । ४६०
ॐ दक्षप्रजापतिमखान्तक्यै नमः ।
ॐ दक्षिणाचाररसिकायै नमः ।
ॐ दयासम्पूर्णमानसायै नमः ।
ॐ दारिद्र्योन्मूलिन्यै नमः ।
ॐ दानशीलायै नमः ।
ॐ दोषविवर्जितायै नमः ।
ॐ दारुकान्तकर्यै नमः ।
ॐ दारुकारण्यमुनिमोहिन्यै नमः ।
ॐ दीर्घदंष्ट्राननायै नमः ।
ॐ दीर्घरसनागीर्णदानवायै नमः । ४७०
ॐ दीक्षितायै नमः ।
ॐ दीक्षिताराध्यायै नमः ।
ॐ दीनसंरक्षणोद्यतायै नमः ।
ॐ दुःखाब्धिबडबायै नमः ।
ॐ दुर्गायै नमः ।
ॐ दुम्बीजायै नमः ।
ॐ दुरितापहायै नमः ।
ॐ दुष्टदूरायै नमः ।
ॐ दुराचारशमन्यै नमः ।
ॐ द्यूतवेदिन्यै नमः । ४८०

ॐ द्विजावगूरणस्वान्तपिशितामोदिताण्डजायै ॐ ऐं ह्रीं श्रीं धं - नमः ।
ॐ धनदायै नमः ।
ॐ धनदाराध्यायै नमः ।
ॐ धनदाप्तकुटुम्बिन्यै नमः ।
ॐ धराधरात्मजायै नमः ।
ॐ धर्मरूपायै नमः ।
ॐ धरणिधूर्धरायै नमः ।
ॐ धात्र्यै नमः ।
ॐ धातृशिरच्छेत्र्यै नमः ।
ॐ धीध्येयायै नमः । ४९०
ॐ ध्रुवपूजितायै नमः ।
ॐ धूमावत्यै नमः ।
ॐ धूम्रनेत्रगर्वसंहारिण्यै नमः ।
ॐ धृत्यै ॐ ऐं ह्रीं श्रीं नं - नमः ।
ॐ नखोत्पन्नदशाकारमाधवायै नमः ।
ॐ नकुलीश्वर्यै नमः ।
ॐ नरनारायणस्तुत्यायै नमः ।
ॐ नलिनायतलोचनायै नमः ।
ॐ नरास्थिस्रग्धरायै नमः ।
ॐ नार्यै नमः । ५००
ॐ नरप्रेतोपरिस्थितायै नमः ।
ॐ नवाक्षर्यै नमः ।
ॐ नाममन्त्रजपप्रीतायै नमः ।
ॐ नटेश्वर्यै नमः ।
ॐ नादचामुण्डिकायै नमः ।
ॐ नानारूपकृते नमः ।
ॐ नास्तिकान्तक्यै नमः ।
ॐ नादब्रह्ममय्यै नमः ।
ॐ नामरूपहीनायै नमः ।
ॐ नताननायै नमः । ५१०
ॐ नारायण्यै नमः ।
ॐ नन्दिविद्यायै नमः ।

ॐ नारदोद्गीतवैभवायै नमः ।
ॐ निगमागमसंवेद्यायै नमः ।
ॐ नेत्र्यै नमः ।
ॐ नीतिविशारदायै नमः ।
ॐ निर्गुणायै नमः ।
ॐ नित्यसन्तुष्टायै नमः ।
ॐ नित्याषोडशिकावृतायै नमः ।
ॐ नृसिंहदर्पशमन्यै नमः । ५२०
ॐ नरेन्द्रगणवन्दितायै नमः ।
ॐ नौकारूढासमुत्तीर्णभवाम्भोधिनिजाश्रितायै ॐ ऐं ह्रीं श्रीं पं - नमः ।
ॐ परमायै नमः ।
ॐ परमज्योतिषे नमः ।
ॐ परब्रह्ममय्यै नमः ।
ॐ परायै नमः ।
ॐ परापरमय्यै नमः ।
ॐ पाशबाणाङ्कुशधनुर्धरायै नमः ।
ॐ पराप्रासादमन्त्रार्थायै नमः ।
ॐ पतञ्जलिसमर्चितायै नमः । ५३०
ॐ पापघ्न्यै नमः ।
ॐ पाशरहितायै नमः ।
ॐ पार्वत्यै नमः ।
ॐ परमेश्वर्यै नमः ।
ॐ पुण्यायै नमः ।
ॐ पुलिन्दिनीपूज्यायै नमः ।
ॐ प्राज्ञायै नमः ।
ॐ प्रज्ञानरूपिण्यै नमः ।
ॐ पुरातनायै नमः ।
ॐ पराशक्त्यै नमः । ५४०
ॐ पञ्चवर्णस्वरूपिण्यै नमः ।
ॐ प्रत्यङ्गिरसे नमः ।
ॐ पानपात्रधरायै नमः ।
ॐ पीनोन्नतस्तन्यै ॐ ऐं ह्रीं श्रीं फं - नमः ।

ॐ फडर्णध्वस्तपापौघदासायै नमः ।
ॐ फणिवरेडितायै नमः ।
ॐ फणिरत्नासनासीनकामेशोत्सङ्गवासिन्यै नमः ।
ॐ फलदायै नमः ।
ॐ फल्गुनप्रीतायै नमः ।
ॐ फुल्लाननसरोरुहायै नमः । ५५०
ॐ पुल्लोत्तप्ताङ्गसाहस्रदलपङ्कजभासुरायै ॐ ऐं ह्रीं श्रीं बं - नमः ।
ॐ बन्धूकसुमनोरागायै नमः ।
ॐ बादरायणदेशिकायै नमः ।
ॐ बालाम्बायै नमः ।
ॐ बाणकुसुमायै नमः ।
ॐ बगलामुखिरूपिण्यै नमः ।
ॐ बिन्दुचक्रस्थितायै नमः ।
ॐ बिन्दुतर्पणप्रीतमानसायै नमः ।
ॐ बृहत्सामस्तुतायै नमः ।
ॐ ब्रह्ममायायै नमः । ५६०
ॐ ब्रह्मर्षिपूजितायै नमः ।
ॐ बृहदैश्वर्यदायै नमः ।
ॐ बन्धहीनायै नमः ।
ॐ बुधसमर्चितायै नमः ।
ॐ ब्रह्मचामुण्डिकायै नमः ।
ॐ ब्रह्मजनन्यै नमः ।
ॐ ब्राह्मणप्रियायै नमः ।
ॐ ब्रह्मज्ञानप्रदायै नमः ।
ॐ ब्रह्मविद्यायै नमः ।
ॐ ब्रह्माण्डनायिकायै नमः । ५७०
ॐ ब्रह्मतालप्रियायै नमः ।
ॐ ब्रह्मपञ्चमञ्चकशायिन्यै नमः ।
ॐ ब्रह्मादिविनुतायै नमः ।
ॐ ब्रह्मपत्न्यै नमः ।
ॐ ब्रह्मपुरस्थितायै नमः ।
ॐ ब्राह्मीमाहेश्वरीमुख्यशक्तिवृन्दसमावृतायै ॐ ऐं ह्रीं श्रीं भं - नमः ।

ॐ भगाराध्यायै नमः ।
ॐ भगवत्यै नमः ।
ॐ भार्गव्यै नमः ।
ॐ भार्गवार्चितायै नमः । ५८०
ॐ भण्डासुरशिरश्छेत्र्यै नमः ।
ॐ भाषासर्वस्वदर्शिन्यै नमः ।
ॐ भद्रायै नमः ।
ॐ भद्रार्चितायै नमः ।
ॐ भद्रकाल्यै नमः ।
ॐ भर्गस्वरूपिण्यै नमः ।
ॐ भवान्यै नमः ।
ॐ भाग्यदायै नमः ।
ॐ भीमायै नमः ।
ॐ भामत्यै नमः । ५९०
ॐ भीमसैनिकायै नमः ।
ॐ भुजङ्गनटनोद्युक्तायै नमः ।
ॐ भुजनिर्जितदानवायै नमः ।
ॐ भ्रुकुटीक्रूरवदनायै नमः ।
ॐ भ्रूमध्यनिलयस्थितायै नमः ।
ॐ भेतालनटनप्रीतायै नमः ।
ॐ भोगिराजाङ्गुलीयकायै नमः ।
ॐ भेरुण्डायै नमः ।
ॐ भेदनिर्मुक्तायै नमः ।
ॐ भैरव्यै नमः । ६००
ॐ भैरवार्चितायै ॐ ऐं ह्रीं श्रीं मं - नमः ।
ॐ मणिमण्डपमध्यस्थायै नमः ।
ॐ माणिक्याभरणान्वितायै नमः ।
ॐ मनोन्मन्यै नमः ।
ॐ मनोगम्यायै नमः ।
ॐ महादेवपतिव्रतायै नमः ।
ॐ मन्त्ररूपायै नमः ।
ॐ महाराज्ञ्यै नमः ।

ॐ महासिद्धालिसंवृतायै नमः ।
ॐ मन्दरादिकृतावासायै नमः । ६१०
ॐ महादेव्यै नमः ।
ॐ महेश्वर्यै नमः ।
ॐ महाहिधमेखलायै नमः ।
ॐ मार्गदुर्गायै नमः ।
ॐ माङ्गल्यदायिन्यै नमः ।
ॐ महाव्रतक्रतुप्रीतायै नमः ।
ॐ माणिभद्रसमर्चितायै नमः ।
ॐ महिषासुरशिरश्छेदनर्तक्यै नमः ।
ॐ मुण्डखमिडन्यै नमः ।
ॐ मात्रे नमः । ६२०
ॐ मरकटश्यामायै नमः ।
ॐ मातङ्ग्यै नमः ।
ॐ मतिसाक्षिण्यै नमः ।
ॐ माधव्यै नमः ।
ॐ माधवाराध्यायै नमः ।
ॐ मधुमांसप्रियायै नमः ।
ॐ मह्यै नमः ।
ॐ मार्यै नमः ।
ॐ मारान्तक क्षोभकारिण्यै नमः ।
ॐ मीनलोचनायै नमः । ६३०
ॐ मालतीकुन्दमालाढ्यायै नमः ।
ॐ माषौदनसमुन्सुकायै नमः ।
ॐ मिथुनासक्तहृदयायै नमः ।
ॐ मोहिताशेषविष्टपायै नमः ।
ॐ मुद्रायै नमः ।
ॐ मुद्राप्रियायै नमः ।
ॐ मूर्खनाशिन्यै नमः ।
ॐ मेषभक्षिण्यै नमः ।
ॐ मूकाम्बायै नमः ।
ॐ मुखजामोदजनकालोकनप्रियायै नमः । ६४०

ॐ मौनव्याख्यापरायै नमः ।
ॐ मौनसत्यचिन्मात्रलक्षणायै नमः ।
ॐ मौञ्जीकच्छधरायै नमः ।
ॐ मौर्वीद्विरेफमुखरोन्मुखायै ॐ ऐं ह्रीं श्रीं यं - नमः ।
ॐ यज्ञवृन्दप्रियायै नमः ।
ॐ यष्ट्र्यै नमः ।
ॐ यान्तवर्णस्वरूपिण्यै नमः ।
ॐ यन्त्ररूपायै नमः ।
ॐ यशोदात्मजातसजुतवैभवायै नमः ।
ॐ यशस्कर्यै नमः । ६५०
ॐ यमाराध्यायै नमः ।
ॐ यजमानाकृतिर्यत्यै नमः ।
ॐ याकिन्यै नमः ।
ॐ यक्षरक्षादिवृतायै नमः ।
ॐ यजनतर्पणायै नमः ।
ॐ याथार्थ्यविग्रहायै नमः ।
ॐ योग्यायै नमः ।
ॐ योगिन्यै नमः ।
ॐ योगनायिकायै नमः ।
ॐ यामिन्यै नमः । ६६०
ॐ यजनोत्साहायै नमः ।
ॐ यामिनीचरभक्षिण्यै नमः ।
ॐ यायजूकर्चितपदायै नमः ।
ॐ यज्ञेश्यै नमः ।
ॐ यक्षिणीश्वर्यै नमः ।
ॐ यासापद्मधरायै नमः ।
ॐ यासापसान्तरपरिष्कृतायै नमः ।
ॐ योषाऽभयङ्कर्यै नमः ।
ॐ योषिद्वृन्दसमर्चितायै ॐ ऐं ह्रीं श्रीं रं - नमः ।
ॐ रक्तचामुण्डिकायै नमः । ६७०
ॐ रात्रिदेवतायै नमः ।
ॐ रागलोलुपायै नमः ।

ॐ रक्तबीजप्रशमन्यै नमः ।
ॐ रजोगन्धनिवारिण्यै नमः ।
ॐ रणरङ्गनट्यै नमः ।
ॐ रत्नमञ्जीरचरणाम्बुजायै नमः ।
ॐ रजध्ववस्ताचलायै नमः ।
ॐ रागहीनमानसहंसिन्यै नमः ।
ॐ रसनालेपितक्रूररक्तबीजकलेवरायै नमः ।
ॐ रक्षाकर्यै नमः । ६८०
ॐ रमायै नमः ।
ॐ रम्यायै नमः ।
ॐ रञ्जिन्यै नमः ।
ॐ रसिकावृतायै नमः ।
ॐ राकिण्यम्बायै नमः ।
ॐ रामनुतायै नमः ।
ॐ रमावाणीनिषेवितायै नमः ।
ॐ रागालापपरब्रह्म शिरो मालाप्रसाधनायै नमः ।
ॐ राजराजेश्वर्यै नमः ।
ॐ राज्ञ्यै नमः । ६९०
ॐ राजीवनयनप्रियायै नमः ।
ॐ राजव्रातकिरीटांशुनीराजितपदाम्बुजायै नमः ।
ॐ रुद्रचामुण्डिकायै नमः ।
ॐ रुक्मसदृशायै नमः ।
ॐ रुधिरप्रियायै नमः ।
ॐ रुद्रताण्डवसामर्थ्यदर्शनोत्सुकमानसायै नमः ।
ॐ रुद्राट्टहाससङ्क्षुभ्यज्जगन्तुष्टिविधायिन्यै नमः ।
ॐ रुद्राण्यै नमः ।
ॐ रुद्रवनितायै नमः ।
ॐ रुरुराजहितैषिण्यै नमः । ७००
ॐ रेणुकायै नमः ।
ॐ रेणुकासूनुस्तुत्यायै नमः ।
ॐ रेवाविहारिण्यै नमः ।
ॐ रोगघ्न्यै नमः ।

ॐ रोषनिर्दग्धशत्रुसेनानिवेशिन्यै नमः ।
ॐ रोहिणीशांशुसंभुतझरीरत्नवितानकायै नमः ।
ॐ रौद्र्यै नमः ।
ॐ रौद्रास्त्रनिर्दग्धराक्षसायै नमः ।
ॐ राहुपूजितायै   ॐ ऐं ह्रीं श्रीं लं - नमः ।
ॐ लघूक्तिवल्गुस्तिमितवाणीत्यक्तविपञ्चिकायै नमः । ७१०
ॐ लज्जावत्यै नमः ।
ॐ ललत्प्रोच्चकेशायै नमः ।
ॐ लम्बिपयोधरायै नमः ।
ॐ लयादिकर्त्र्यै नमः ।
ॐ लोमालिलतानाभीसरः कट्यै नमः ।
ॐ ललदोष्ठदलद्वन्द्ववदनायै नमः ।
ॐ लक्ष्यदूरगायै नमः ।
ॐ ललन्तिकामणीभास्वन्निटिलश्रीमुखाम्बुजायै नमः ।
ॐ ललाटार्धनिशानाथकलङ्कोद्भासिलोचनायै नमः ।
ॐ ललितायै नमः । ७२०
ॐ लोभिन्यै नमः ।
ॐ लोभहीनायै नमः ।
ॐ लोकेश्वर्यै नमः ।
ॐ लघवे नमः ।
ॐ लक्ष्मयै नमः ।
ॐ लक्ष्मीशसहजायै नमः ।
ॐ लक्ष्मणाग्रजवन्दितायै नमः ।
ॐ लाकिन्यै नमः ।
ॐ लघितापृभोधिनिवहायै नमः ।
ॐ ललिताम्बिकायै नमः । ७३०
ॐ लाजहोमप्रियायै नमः ।
ॐ लम्बमुक्ताभासुरनासिकायै नमः ।
ॐ लाभालाभादिरहितायै नमः ।
ॐ लास्यदर्शनकोविदायै नमः ।
ॐ लावण्यदर्शनोद्विग्नरतीशायै नमः ।
ॐ लघुभाषिण्यै नमः ।

ॐ लाक्षारसाञ्चितपदायै नमः ।
ॐ लघुश्यामायै नमः ।
ॐ लतातनवे नमः ।
ॐ लाक्षालक्ष्मीतिरस्कारियुगलाधरपल्लवायै नमः । ७४०
ॐ लीलागतिपराभूतहंसायै नमः ।
ॐ लीलाविनोदिन्यै नमः ।
ॐ लीलानन्दनकल्पद्रुमलताडोलाविहारिण्यै नमः ।
ॐ लीलापीताब्धिविनुतायै नमः ।
ॐ लीलास्वीकृतविग्रहायै नमः ।
ॐ लीलाशुकोस्तिमुदितायै नमः ।
ॐ लीलामृगविहारिण्यै नमः ।
ॐ लोकमात्रे नमः ।
ॐ लोकसृष्टिस्थितिसंहारकारिण्यै नमः ।
ॐ लोकातीतपदायै नमः । ७५०
ॐ लोकवन्द्यायै नमः ।
ॐ लोकैकसाक्षिण्यै नमः ।
ॐ लोकातीताकृतये नमः ।
ॐ लब्धमार्गत्यागपरान्तक्यै नमः ।
ॐ लोकानुल्लङ्घितनिजशासनायै नमः ।
ॐ लब्धविग्रहायै नमः ।
ॐ लोमावलिलता-लम्बिस्तनयुग्मनताननायै नमः ।
ॐ लोलचित्तविदूरस्थायै नमः ।
ॐ लोमलम्ब्यण्डजालकायै नमः ।
ॐ लंबितारिशिरोहस्तायै नमः । ७६०
ॐ लोकरक्षापरायणायै ॐ ऐं ह्रीं श्रीं वं - नमः ।
ॐ वनदुर्गायै नमः ।
ॐ विन्ध्यदलवासिन्यै नमः ।
ॐ वामकेश्वर्यै नमः ।
ॐ वशिन्यादिस्तुतायै नमः ।
ॐ वह्निज्वालोद्गारिमुख्यै नमः ।
ॐ वरायै नमः ।
ॐ वक्षोजययुग्मविरहासहिष्णुकरशङ्करायै नमः ।

ॐ वाङ्मनोतीतविषयायै नमः ।
ॐ वामाचारसमुत्सुकायै नमः । ७७०
ॐ वाजपेयाध्वरानन्दायै नमः ।
ॐ वासुदेवेष्टदायिन्यै नमः ।
ॐ वादित्रध्वनिसम्भ्रान्तदिग्गजालये नमः ।
ॐ विधीडितायै नमः ।
ॐ वामदेववसिष्ठादिपूजितायै नमः ।
ॐ वारिदप्रभायै नमः ।
ॐ वामस्तनाश्लिष्टहस्तपद्मशम्भुविहारिण्यै नमः ।
ॐ वाराह्यै नमः ।
ॐ वास्तुमध्यस्थायै नमः ।
ॐ वासवान्तः पुरेष्टदायै नमः । ७८०
ॐ वाराङ्गनानीतपूर्णकुम्भदीपालिमण्टपायै नमः ।
ॐ वारिजासनशीर्षालिमालायै नमः ।
ॐ वार्धिसरोवरायै नमः ।
ॐ वारितासुरदर्पश्रीयै नमः ।
ॐ वार्धघ्नीमन्त्ररूपिण्यै नमः ।
ॐ वार्ताल्यै नमः ।
ॐ वारुणीविद्यायै नमः ।
ॐ वरुणारोग्यदायिन्यै नमः ।
ॐ विजयायै नमः ।
ॐ विजयास्तुत्यायै नमः । ७९०
ॐ विरूपायै नमः ।
ॐ विश्वरूपिण्यै नमः ।
ॐ विप्रशात्रुकदम्बघ्न्यै नमः ।
ॐ विप्रपूज्यायै नमः ।
ॐ विषापहायै नमः ।
ॐ विरिञ्चिशिक्षणोद्युक्तमधुकैटभनाशिन्यै नमः ।
ॐ विश्वमात्रे नमः ।
ॐ विशालाक्ष्यै नमः ।
ॐ विरागायै नमः ।
ॐ वीशवाहनायै नमः । ८००

ॐ वीतरागवृतायै नमः ।
ॐ व्याघ्रपाद नृत्तप्रदर्शिन्यै नमः ।
ॐ वीरभद्रहतोन्मत्तदक्षयज्ञाश्रितामरायै नमः ।
ॐ वेदवेद्यायै नमः ।
ॐ वेदरूपायै नमः ।
ॐ वेदाननसरोरुहायै नमः ।
ॐ वेदान्तविषयायै नमः ।
ॐ वेणुनादज्ञायै नमः ।
ॐ वेदपूजितायै नमः ।
ॐ वौषड्मन्त्रमयाकारायै नमः । ८१०
ॐ व्योमकेश्यै नमः ।
ॐ विभावर्यै नमः ।
ॐ वन्द्यायै नमः ।
ॐ वाग्वादिन्यै नमः ।
ॐ वन्यमांसाहारायै नमः ।
ॐ वनेश्वर्यै नमः ।
ॐ वाञ्छाकल्पलतायै नमः ।
ॐ वाण्यै नमः ।
ॐ वाक्प्रदायै नमः ।
ॐ वागधीश्वर्यै ॐ ऐं ह्रीं श्रीं शं - नमः । ८२०
ॐ शक्तिवृन्दावृतायै नमः ।
ॐ शब्दमय्यै नमः ।
ॐ श्रीचक्ररूपिण्यै नमः ।
ॐ शबर्यै नमः ।
ॐ शबरीदुर्गायै नमः ।
ॐ शरभेशाच्छदाकृत्यै नमः ।
ॐ शब्दजालोद्भवढक्कारवासन्दिग्धतापसायै नमः ।
ॐ शरणागतसन्त्राणपरायणपटीयस्यै नमः ।
ॐ शशाङ्कशेखरायै नमः ।
ॐ शस्त्रधरायै नमः । ८३०
ॐ शतमुखाम्बुजायै नमः ।
ॐ शातोदर्यै नमः ।

ॐ शान्तिमत्यै नमः ।
ॐ शरच्चन्द्रनिभाननायै नमः ।
ॐ शापापनोदनचणायै नमः ।
ॐ शङ्कादोषादिनाशिन्यै नमः ।
ॐ शिवकामसुन्दर्यै नमः ।
ॐ श्रीदायै नमः ।
ॐ शिववामाङ्गवासिन्यै नमः ।
ॐ शिवायै नमः । ८४०
ॐ श्रीदाननिपुणलोचनायै नमः ।
ॐ श्रीपतिप्रियायै नमः ।
ॐ शुकादिद्विजवृन्दोक्तिस्तब्धमानसगीष्पत्यै नमः ।
ॐ शुक्रमण्डलसङ्काशमुक्तामालायै नमः ।
ॐ शुचिस्मितायै नमः ।
ॐ शुक्लदंष्ट्राग्रसन्दीप्तपातालभ्रान्तपन्नगायै नमः ।
ॐ शुभ्रासनायै नमः ।
ॐ शूरसेनावृतायै नमः ।
ॐ शूलादिनाशिन्यै नमः ।
ॐ शूकवृश्चिकनागाखुर्वृकहिंस्रालिसंवृतायै नमः । ८५०
ॐ शूलिन्यै नमः ।
ॐ शूलङ्गाहिशङ्खचक्रगदाधरायै नमः ।
ॐ शोकाब्धिशोषणोद्युक्तबडवायै नमः ।
ॐ श्रोत्रियावृतायै नमः ।
ॐ शङ्करालिङ्गनानन्दमेदुरायै नमः ।
ॐ शीतलाम्बिकायै नमः ।
ॐ शङ्कर्यै नमः ।
ॐ शङ्करार्धाङ्गहरायै नमः ।
ॐ शाक्करवाहनायै नमः ।
ॐ शम्भुकोपाग्निनिर्दग्धमदनोत्पादकेक्षणायै नमः । ८६०
ॐ शाम्भव्यै नमः ।
ॐ शम्भुहस्ताब्जलीलारुणकरावल्यै नमः ।
ॐ श्रीविद्यायै नमः ।
ॐ शुभदायै नमः ।

ॐ शुभवस्त्रायै नमः ।
ॐ शुम्भासुरान्तक्यै ॐ ऐं ह्रीं श्रीं षं - नमः ।
ॐ षडाधाराब्जनिलयायै नमः ।
ॐ षाड्गुण्यश्रीप्रदायिन्यै नमः ।
ॐ षडूर्मिघ्न्यै नमः ।
ॐ षडध्वान्तपदारूढस्वरूपिण्यै नमः । ८७०
ॐ षट्कोणमध्यनिलयायै नमः ।
ॐ षडर्णायै नमः ।
ॐ षान्तरूपिण्यै नमः ।
ॐ षड्जादिस्वरनिर्मात्र्यै नमः ।
ॐ षडङ्गयुवतीश्वर्यै नमः ।
ॐ षड्भावरहितायै नमः ।
ॐ षण्डकण्टक्यै नमः ।
ॐ षण्मुखप्रियायै नमः ।
ॐ षड्रसास्वादमुदितायै नमः ।
ॐ षष्ठीशादिमदेवतायै नमः । ८८०
ॐ षोढान्यासमयाकारायै नमः ।
ॐ षोडशाक्षरदेवतायै ॐ ऐं ह्रीं श्रीं सं - नमः ।
ॐ सकलायै नमः ।
ॐ सच्चिदानन्दलक्षणायै नमः ।
ॐ सौख्यदायिन्यै नमः ।
ॐ सनकादिमुनिध्येयायै नमः ।
ॐ सन्ध्यानाट्यविशारदायै नमः ।
ॐ समस्तलोकजनन्यै नमः ।
ॐ सभानटनरञ्जिन्यै नमः ।
ॐ सरः पुलिनलीलार्थियुवतीनिवहोत्सुकायै नमः । ८९०
ॐ सरस्वत्यै नमः ।
ॐ सुराराध्यायै नमः ।
ॐ सुरापानप्रियासुरायै नमः ।
ॐ सरोजलविहारोद्यत्प्रियाकृष्टोत्तरांशुकायै नमः ।
ॐ साध्यायै नमः ।
ॐ साध्यादिरीहतायै नमः ।

ॐ स्वतन्त्रायै नमः ।
ॐ स्वस्तिरूपिण्यै नमः ।
ॐ साध्व्यै नमः ।
ॐ सङ्गीतरसिकायै नमः । ९००
ॐ सर्वदायै नमः ।
ॐ सर्वमङ्गलायै नमः ।
ॐ सामोद्गीतनिजानन्दमहिमालये नमः ।
ॐ सनातनायै नमः ।
ॐ सारस्वतप्रदायै नमः ।
ॐ सामायै नमः ।
ॐ संसारार्णवतारिणीम् नमः ।
ॐ सावित्र्यै नमः ।
ॐ सङ्गनिर्मुक्तायै नमः ।
ॐ सतीश्यै नमः । ९१०
ॐ सर्वतोमुख्यै नमः ।
ॐ साख्यतत्वज्ञनिवहव्यापिसालायै नमः ।
ॐ सुखेश्वर्यै नमः ।
ॐ सिद्धसङ्घावृतायै नमः ।
ॐ सान्ध्यवन्दितायै नमः ।
ॐ साधुसत्कृतायै नमः ।
ॐ सिंहासनगतायै नमः ।
ॐ सर्वशृङ्गाररसवारिध्यै नमः ।
ॐ सुधाब्धिमध्यनिलयायै नमः ।
ॐ स्वर्णद्वीपान्तरस्थितायै नमः । ९२०
ॐ सुधासिक्तालवालोद्यत्कायमानलतागृहायै नमः ।
ॐ सुभगायै नमः ।
ॐ सुन्दर्यै नमः ।
ॐ सुभ्रुवे नमः ।
ॐ समुपास्यत्वलक्षणायै नमः ।
ॐ सुरद्रुसङ्कुलाभोगतटायै नमः ।
ॐ सौदामिनीनिभायै नमः ।
ॐ सुरभीकेशसम्भ्रान्तद्विरेफमुखरान्वितायै नमः ।

ॐ सूर्यचन्द्रांशुधिक्कारिप्रभारत्नालिमण्डपायै नमः ।
ॐ सोमपानोद्भवामोदविप्रगीतापदानकायै नमः । ९३०
ॐ सोमयागप्रियायै नमः ।
ॐ सोमसूर्यवह्निविलोचनायै नमः ।
ॐ सौगन्धिकमरुद्वेगमोदितायै नमः ।
ॐ सद्विलासिन्यै नमः ।
ॐ सौन्दर्यमोहिताधीनवल्लभायै नमः ।
ॐ सन्ततिप्रदायै नमः ।
ॐ सौभाग्यमन्त्रिण्यै नमः ।
ॐ सत्यवादायै नमः ।
ॐ सागरमेखलायै नमः ।
ॐ स्वश्वासोच्छवासभुवनमोचनोन्मोचनायै नमः । ९४०
ॐ स्वधायै ॐ ऐं ह्रीं श्रीं हं - नमः ।
ॐ हयारूढायै नमः ।
ॐ हयग्रीवविनुतायै नमः ।
ॐ हतकिल्बिषायै नमः ।
ॐ हरालिङ्गनशीतांशून्मिषन्नेत्रमुद्वत्यै नमः ।
ॐ हरिनाभिसमुद्भूतविरिञ्चिविनुतायै नमः ।
ॐ हरायै नमः ।
ॐ हादिविद्यायै नमः ।
ॐ हाकिन्यै नमः ।
ॐ हरिचण्डिकायै नमः । ९५०
ॐ हारावलिप्रभादीप्तायै नमः ।
ॐ हरिदन्तदिगम्बरायै नमः ।
ॐ हालाहलविषोद्विग्नविष्टापानेकरक्षक्यै नमः ।
ॐ हाहाकाररवोद्गीतदनुजायै नमः ।
ॐ हारमञ्जुलायै नमः ।
ॐ हिमाद्रितनयायै नमः ।
ॐ हीरमकुटायै नमः ।
ॐ हारपन्नगायै नमः ।
ॐ हुताशनधरायै नमः ।
ॐ होमप्रियायै नमः । ९६०

ॐ होत्र्यै नमः ।
ॐ हयेश्वर्यै नमः ।
ॐ हेमपद्मधरायै नमः ।
ॐ हेमवर्मराजसमर्चितायै नमः ।
ॐ हंसिन्यै नमः ।
ॐ हंसमन्त्रार्थायै नमः ।
ॐ हंसवाहायै नमः ।
ॐ हराङ्गभृते नमः ।
ॐ हृद्यायै नमः ।
ॐ हृद्यमनोनित्यनिवासायै नमः । ९७०
ॐ हरकुटुम्बिन्यै नमः ।
ॐ ह्रीमत्यै नमः ।
ॐ हृदयाकाशतरण्यै नमः ।
ॐ ह्रिम्परायणायै   ॐ ऐं ह्रीं श्रीं क्षं - नमः ।
ॐ क्षणदाचरसंहारचतुरायै नमः ।
ॐ क्षुद्रदुर्मुखायै नमः ।
ॐ क्षणदार्च्यायै नमः ।
ॐ क्षपानाथसुधार्द्रकबर्यै नमः ।
ॐ क्षित्यै नमः ।
ॐ क्षमायै नमः । ९८०
ॐ क्षमाधरसुतायै नमः ।
ॐ क्षामक्षोभविनाशिन्यै नमः ।
ॐ क्षिप्रसिद्धिम्प्रदायै नमः ।
ॐ क्षिप्रगमनायै नमः ।
ॐ क्षुण्णिवारिण्यै नमः ।
ॐ क्षीणपुण्यासुहृते नमः ।
ॐ क्षीरवर्णायै नमः ।
ॐ क्षयविवर्जितायै नमः ।
ॐ क्षीरान्नाहारमुदितायै नमः ।
ॐ क्ष्म्र्यूम्मन्त्राप्तेष्टयोगिराजे नमः । ९९०
ॐ क्षीराब्धितनयायै नमः ।
ॐ क्षीरघृतमध्वासवार्चितायै नमः ।

ॐ क्षुधार्तिदीनसन्त्राणायै नमः ।
ॐ क्षितिसंरक्षणक्षमायै नमः ।
ॐ क्षेमङ्कर्यै नमः ।
ॐ क्षेत्रपालवन्दितायै नमः ।
ॐ क्षेत्ररूपिण्यै नमः ।
ॐ क्षौमाम्बरधरायै नमः ।
ॐ क्षत्रसंप्रार्थितजयोत्सवायै नमः ।
ॐ क्ष्वेलभुग्ग्रसनास्वादजातवाग्रसवैभवायै नमः । १०००

इति श्रीभृङ्गिरिटिसंहितायां शक्त्युत्कर्षप्रकरणे शिवगौरीसंवादे श्रीशिवकामसुन्दरीसहस्रनामावलिः सम्पूर्णा ॥

Proofread by DPD, Sneha Sudha snehasudha13 at gmail.com

*shrIshivakAmasundarIsahasranamastotram*
pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*